# Shivena Ribhum Prati Shivarchanopadeshah

# શિવેન ઋભું પ્રતિ શિવાર્ચનોપદેશઃ

## Document Information

Text title : Shivena Ribhum Prati Shivarchanopadeshah

File name : shivenaRRibhuMpratishivArchanopadeshaH.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 3 | 21-43||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# શિવેન ઋભું પ્રતિ શિવાર્ચનોપદેશઃ

વેદાન્તપાઠપઠનેન હઠાદિયોગૈઃ શ્રીનીલકણ્ઠપદભક્તિવિકુણ્ઠભાવાઃ ।
યે કર્મઠા યતિવરા હરિસૌરિગેહે સાલાવૃકૈર્વરકઠોરકુઠારઘાતૈઃ ॥ ૧॥

ભિન્નોત્તમાઙ્ગહૃદયાશ્ચ ભુસુણ્ડિભિસ્તે ભિક્ષાશના જરઠરાસભવદ્ભ્રમન્તિ ॥ ૨॥

વિદ્યુચ્ચઞ્ચલજીવિતેઽપિ ન મનાગુત્પદ્યતે શામ્ભવી
ભક્તિર્ભીમપદામ્બુજોત્તમપદે ભસ્મત્રિપુણ્ડ્રેઽપિ ચ ।
રુદ્રાક્ષામલરુદ્રસૂક્તિજપને નિષ્ઠા કનિષ્ઠાત્મનાં
વિષ્ઠાવિષ્ટકુનિષ્ઠકષ્ટકુધિયાં દુષ્ટાત્મનાં સર્વદા ॥ ૩॥

ભ્રષ્ટાનાં દુરદૃષ્ટતો જનિજરાનાશેન નષ્ટાત્મનાં
જ્યેષ્ઠશ્રીશિપિવિષ્ટચારુચરણામ્ભોજાર્ચનાનાદરઃ ।
તેનાનિષ્ટપરમ્પરાસમુદયૈરષ્ટાકૃતેર્ન સ્મૃતિઃ
વિષ્ઠાપૂરિતદુર્મુખેષુ નરકે ભ્રષ્ટે ચિરં સંસ્થિતિઃ ॥ ૪॥

અજ્ઞાયત્તેષ્વભિજ્ઞાઃ સુરવરનિકરં સ્તોત્રશાસ્ત્રાદિતુષ્ટં
સત્રાશં મન્ત્રમાત્રૈર્વિધિવિહિતધિયા સામભાગૈર્યજન્તિ ।
શ્રાદ્ધે શ્રદ્ધાભરણહરણભ્રાન્તરૂપાન્પિતૄંસ્તે
તત્તચ્છ્રદ્ધાસમુદિતમનઃ સ્વાન્તરા શમ્ભુમીશમ્ ॥

નાભ્યર્ચન્તિ પ્રણતશરણં મોક્ષદં માં મહેશમ્ ॥ ૫॥

આર્યાઃ શર્વસમર્ચનેન સતતં દૂર્વાદલૈઃ કોમલૈઃ
બિલ્વાખર્વદલૈશ્ચ શઙ્કરમહાભાગં હૃદન્તઃ સદા ।
પર્વસ્વપ્યવિશેષિતેન મનસા ગર્વં વિહાયાદરાત્
દુર્ગાણ્યાશુ તરન્તિ શઙ્કરકૃપાપીયૂષધારારસૈઃ ॥ ૬॥

શ્રીચન્દ્રચૂડચરણામ્બુજ પૂજનેન કાલં નયન્તિ પશુપાશવિમુક્તિહેતોઃ ।
ભાવાઃ પરં ભસિતભાલલસત્ત્રિપુણ્ડ્રરુદ્રાક્ષકઙ્કણલસત્કરદણ્ડયુગ્માઃ ॥ ૭॥

પઞ્ચાક્ષરપ્રણવસૂક્તધિયા વદન્તિ નામાનિ શામ્ભવમનોહરદાનિ શમ્ભો ।

મુક્તિપ્રદાનિ સતતં શિવભક્તવર્યાઃ યે બિલ્વમૂલશિવલિઙ્ગસમર્ચનેન ॥ ૮॥

કાલં નયેદ્વિમલકોમલબિલ્વપત્રૈઃ નો તસ્ય કાલજભયં ભવતાપપાપમ્ ।
સન્તાપભૂપજનિતં ભજતાં મહેશમ્ ॥ ૯॥

શશ્વદ્વિશ્વેશપાદૌ યમશમનિયમૈર્ભૂતિરુદ્રાક્ષગાત્રો
વિશ્વત્રસ્તો ભુજઙ્ગાઙ્ગદવરગિરિજાનાયકે લબ્ધભક્તિઃ ।
મુગ્ધોઽપ્યધ્યાત્મવિદ્ યો ભવતિ ભવહરસ્યાર્ચયા પ્રાપ્તકામઃ ॥ ૧૦॥

શબ્દૈરબ્દશતેઽપિ નૈવ સ લભેત્ જ્ઞાનં ન તર્કભ્રમૈઃ
મીમાંસા દ્વયતઃ (હૃયતો) તથાદ્વયપદં કિં સાઙ્ખ્યસઙ્ખ્યા વદ ।
યોગાયાસપરમ્પરાદિવિહિતૈર્વેદાન્તકાન્તારકે
શ્રામ્યન્ભક્તિવિવર્જિતેન મનસા શમ્ભોઃ પદે મુક્તયે ॥ ૧૧॥

કિં ગઙ્ગયા વા મકરે પ્રયાગસ્નાનેન વા યોગમખક્રિયાદ્યૈઃ ।
યત્રાર્ચિતં લિઙ્ગવરં શિવસ્ય તત્રૈવ સર્વાર્થપરમ્પરા સ્યાત્ ॥ ૧૨॥

શ્રીશૈલો હિમભૂધરોઽરુણગિરિર્વૃદ્ધાદ્રિગોપર્વતૌ
શ્રીમદ્ધેમસભાવિહાર ભગવન્નૃત્તં ત્રિનેત્રો ગિરિઃ ।
કૈલાસોત્તરદક્ષિણૌ ચ ભગવાન્યત્રાર્ચને શઙ્કરો લિઙ્ગે
સન્નિહિતો વસત્યનુદિનં શાઙ્ગસ્ય હૃત્પઙ્કજે ॥ ૧૩॥

તત્રાવિમુક્તં શશિચૂડવાસમોઙ્કારકાલઞ્જર રુદ્રકોટિમ્ ।
ગઙ્ગાબુધેઃ સઙ્ગમમમ્બિકાપતિપ્રિયં તુ ગોકર્ણકસહ્યજાતટમ્ ॥ ૧૪॥

યત્રાભ્યર્ણગતં મહેશકરુણાપૂર્ણં તુ તૂર્ણં હૃદા
લિઙ્ગં પૂજિતમપ્યપાસ્તદુરિતં તીર્થાનિ ગઙ્ગાદયઃ ।
પુણ્યાશ્વાશ્રમસઙ્ઘકા ગિરિવરક્ષેત્રાણિ શમ્ભોઃ પદં
ભક્તિયુક્તભજનેન મહેશે શક્તિવજ્જગદિદં પરિભાતિ ॥ ૧૫॥

કર્મન્દિવૃન્દા અપિ વેદમૌલિસિદ્ધાન્તવાક્યકલનેઽપિ ભવન્તિ મન્દાઃ ।
કામાદિબદ્ધહૃદયાઃ સિતભસ્મપુણ્ડ્રરુદ્રાક્ષ શઙ્કરસમર્ચનતો વિહીનાઃ ॥ ૧૬॥

હીના ભવન્તિ બહુધાપ્યબુધા ભવન્તિ મત્પ્રેમવાસભવનેષુ વિહીનવાસાઃ ॥ ૧૭॥

અષ્ટમ્યામષ્ટમૂર્તિર્નિશિ શશિદિવસે સોમચૂડં તુ મુક્ત્યૈ
ભૂતાયાં ભૂતનાથં ધૃતભસિતતનુર્વીતદોષે પ્રદોષે ।
ગવ્યૈઃ પઞ્ચામૃતાદ્યૈઃ ફલવરજરસૈર્બિલ્વપત્રૈશ્ચ લિઙ્ગે
તુઙ્ગે શાઙ્ગેઽપ્યસઙ્ગો ભજતિ યતહૃદા નક્તભુક્ત્યૈકભક્તઃ ॥ ૧૮॥

જ્ઞાનાનુત્પત્તયે તદ્ધરિવિધિસમતાબુદ્ધિરીશાનમૂર્તૌ
ભસ્માક્ષાધૃતિરીશલિઙ્ગભજનાશૂન્યં તુ દુર્માનસમ્ ।
શમ્ભોસ્તીર્થમહત્સુતીર્થવરકે નિન્દાવરે શાઙ્કરે
(દ્રોહેસ્તદર્થેષુ ચ) શ્રીમદ્રુદ્રજપાદ્યદ્રોહકરણાજ્જ્ઞાનં ન ચોત્પદ્યતે ॥ ૧૯॥

ઈશોત્કર્ષધિયૈકલિઙ્ગનિયમાદભ્યર્ચનં ભસ્મધૃક્
રુદ્રાક્ષામલ સારમન્ત્ર સુમહાપઞ્ચાક્ષરે જાપિનામ્ ।
ઈશસ્થાનનિવાસશામ્ભવકથા ભક્તિશ્ચ સઙ્કીર્તનં
ભક્તસ્યાર્ચનતો ભવેત્સુમહાજ્ઞાનં પરં મુક્તિદમ્ ॥ ૨૦॥

આદ્યન્તયોર્યઃ પ્રણવેન યુક્તં શ્રીરુદ્રમન્ત્રં પ્રજપત્યઘઘ્નં (પ્રજપદેઘઘ્નમ્) ।
તસ્યાઙ્ઘ્રિરેણું શિરસા વહન્તિ બ્રહ્માદયઃ સ્વાઘનિવૃત્તિકામાઃ ॥ ૨૧॥

અપૂર્વાથર્વોક્ત શ્રુતિશિરસિ વિજ્ઞાનમનઘં
મહાખર્વાજ્ઞાનપ્રશમનકરં યો વિરચયેત્ ।
મુને હૃત્પર્વાણાં વિશસનકરં સપ્તમનુભિર્વ્રતં
શીર્ષણ્યં યો વિરચયતિ તસ્યેદમુદિતમ્ ॥ ૨૨॥

ગુરૌ યસ્ય પ્રેમ શ્રુતિશિરસિ સૂત્રાર્થપદગં
મયિ શ્રદ્ધા વૃદ્ધા ભવતિ કિલ તસ્યૈષ સુલભઃ ।
અનન્યો માર્ગોઽયમકથિતમિદમ્ત્વય્યપિ મુદા
યદા ગોપ્યો મુગ્ધે સુવિહિતમુનિષ્વેવ દિશ વૈ ॥ ૨૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવેન ઋભું પ્રતિ શિવાર્ચનોપદેશઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૩ । ૨૧-૪૩॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 3 . 21-43..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Shivena Ribhum Prati Shivarchanopadeshah*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*